Roll NO...................

Total No. of Pages: 4

Total No. of Questions: 14

वार्षिक परीक्षा 2025–26

पूर्वमध्यमा द्वितीय खण्ड

दर्शनम् 1015

आदर्श उत्तर 1

समयः3घण्टे

पूर्णांकः100

---

निर्देशः—अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः।

1. उचित विकल्पं चित्वा लिखत– 1x6=6

(क) –(अ) असाधारणधर्मः
(ख) –(अ) न्याय–वैशेषिक
(ग) –(अ) वस्तुनः अनुपस्थितिः
(घ) –(अ) मोक्षं
(ङ) –(अ) यज्ञम्
(च) –(ब) धीरस्य

2. रिक्त स्थानानि पूरयत– 1x6=6

(क) पंच
(ख) केवलमांकाशे
(ग) आत्मविद्या
(घ) त्रयः
(ङ) परमाणु
(च) हेतुः

---

3. यथोचितं युग्मं मेलयत्– 1x6=6

| | | |
|---|---|---|
| (क) | अभावः | चतुर्विधः |
| (ख) | आश्रयासिद्धहेत्वाभासः | गगनारविन्दं |
| (ग) | प्रत्यक्षज्ञानं | द्विविधम् |
| (घ) | गौतमः | न्यायदर्शनम् |
| (ङ) | पदार्थः | सामान्यः |
| (च) | अहितकरं | प्रेयः |

4. अधोलिखितेषु वाक्येषु सत्यं/असत्यं लिखत– 1x7=7

पञ्चपल्लवः नाम पञ्चानां पवित्रवृक्षाणां पल्लवाः (पत्राणि) भवन्ति। एतेषां पल्लवानां प्रयोगः कलशे कृत्वा जलं पवित्रं क्रियते तथा च तेन जलेन अभ्युक्षणं (छिड़काव) कृत्वा स्थानस्य, वस्तूनां जनानां च शुद्धिः क्रियते।

पञ्चपल्लवाः

पञ्चपल्लवाः सामान्यतया एते भवन्ति

1 अश्वत्थः (पीपलः)

2 वटः (बरगदः)

3 आम्रः (आम्रवृक्षः)

4 प्लक्षः (पाकडवृक्षः)

5 उदुम्बरः (गूलरवृक्षः)

पञ्चपल्लवस्य महत्त्वम्

1 पवित्रतायाः प्रतीकः एते वृक्षाः शास्त्रेषु पवित्राः कथिताः सन्ति।

2 देवानां निवासः एतेषु वृक्षेषु देवतानां वासः इति विश्वासः अस्ति।

3 पञ्चमहाभूतानां प्रतीकः पञ्चपल्लवाः पृथिवी, आपः, तेजः, वायुः, आकाशः इत्येतानां प्रतीकाः मन्यन्ते।

4 मङ्गलप्रदाः एतेषां प्रयोगेण कार्ये मङ्गलं, शान्तिः, समृद्धिः च भवति।

5 शुद्धिकरणम् पञ्चपल्लवयुक्तेन जलेन अभ्युक्षणं कृत्वा वातावरणस्य शुद्धिः भवति।

*****************000000*****************

(क) असत्यं
(ख) सत्यं
(ग) सत्यं
(घ) सत्यं
(ङ) असत्यं
(च) सत्यं
(छ) सत्यं

5. एकपदीय प्रश्नाः–

1x7= 7

(क) त्रयः
(ख) यजुर्वेदः
(ग) त्वां यमाय ददामि
(घ) असाधारणं कारणं करणमुच्यते
(ङ) द्विविधः
(च) कार्यरूपः
(छ) त्रयो भेदाः

6.लघूत्तरीय प्रश्नाः–

2x10=20

(क) नचिकेतः सत्यस्य,धैर्यस्य,ज्ञानस्य च आदर्शः अस्ति।
(ख) अन्नभट्टस्य विश्वप्रसिद्धः ग्रन्थः तर्कसंग्रहः अस्ति ।
(ग) एषः उपदेशः यमराजेन नचिकेताय दत्त ।
(घ) आत्मज्ञानप्राप्तये ॐकारस्य उपासना क्रियते ।
(ङ) अग्निविद्या स्वर्गप्राप्तेः साधनं यज्ञविद्या अस्ति।
(च) यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्ति ।
(छ) उपमितेः करणमुपमानं सादृश्यज्ञानरूपम् ।
(ज) यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः कथ्यते।
(झ) परामर्शजन्यं ज्ञानमनुमितिः कथ्यते।
(ञ) शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षो भवति ।

7.लघूत्तरीय प्रश्नाः–

3x6=18

(क) **शरीरं नश्वरं परिवर्तनशीलं च अस्ति, किन्तु आत्मा नित्यः, अविनाशी च अस्ति। शरीरं जडं भवति, आत्मा तु चेतनस्वरूपः अस्ति। शरीरं जन्म-मरणयोः अधीनं भवति, परन्तु आत्मा ताभ्यां परे अस्ति। अतः आत्मा शरीरात् भिन्नः इति ज्ञायते।**

(ख) **त्यागेन मनुष्यः आत्मसन्तोषं, यशः, सम्मानं च प्राप्नोति। त्यागशीलः पुरुषः लोकस्य आदर्शः भवति। त्यागेन समाजस्य कल्याणं भवति तथा मनुष्यस्य आध्यात्मिक उन्नतिः अपि भवति ।**

(ग) शब्दः द्विविधो– ध्वन्यात्मको वर्णात्मकश्चेति ।

अथवा

**परिसमूहनम् संस्कारः (पञ्चभूसंस्कारस्य सन्दर्भे)**

**पञ्चभूसंस्काराः यज्ञकर्मणि पूजाकर्मणि च भूमेः शुद्ध्यर्थं क्रियमाणाः पञ्च संस्काराः सन्ति। तेषु प्रथमः संस्कारः परिसमूहनम् इति कथ्यते। परिसमूहनम् नाम कुशैः झाडूपत्रैः वा भूमेः सम्यक् मार्जनम्। अस्मिन् संस्कारे यज्ञस्थलं पूजास्थलं वा सर्वतः सम्यक् शुद्धीकृत्य धूलि-मलादीन् अपसार्यते।**

**परिभाषा :**

**कुशादिभिः भूमेः सम्यक् मार्जनं परिसमूहनम् इति उच्यते।**

**महत्त्वम् :**

1 **अनेन संस्कारेण भूमेः बाह्यशुद्धिः भवति।**

2 **धूलि-मलादयः अशुद्धयः अपसार्यन्ते।**

3 **देवपूजायै यज्ञकर्मणि च स्थानं पवित्रं भवति।**

**अतः यज्ञकर्मणः पूजाकर्मणः च आरम्भे परिसमूहनम् संस्कारः अत्यन्तं आवश्यकः मन्यते।**

प्रश्न 28 का उत्तर

ॐ सविता त्वा सवानासुवतामग्निर्गुपतीनाथ सोमोवनस्पतीनाम् ।
बृहस्पतिर्वाचऽइन्द्रोज्येष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो व्वरुणो धर्मपतीनाम् ॥

भावार्थः - हे यजमान ! सविता त्वां प्रेरयन्तु, अग्निः त्वां गृहस्थानाम् आधिपत्ये स्थापयतु, सोमः त्वां वृक्षाणाम् आधिपत्ये प्रेरयतु, बृहस्पतिः त्वां पाण्डित्ये प्रेरयतु, इन्द्रः ज्येष्ठभावाय त्वां प्रेरयतु रुद्रः पशूनाम् आधिपत्ये त्वां प्रेरयतु, मित्रः देवः सत्यं वक्तुं त्वां प्रेरयतु, वरुणः धर्मशीलानाम् आधिपत्ये त्वां प्रेरयतु ॥

अथवा

ॐ अश्वत्त्थोदुम्बरौ प्लक्षः चूतन्यग्रोधपल्लवाः ।
पञ्चैतान् पल्लवानस्मिन् कलशे प्रक्षिपाम्यहम् ॥

पुण्याहवाचने पञ्चपल्लवस्य महत्त्वम्

पुण्याहवाचने पञ्चपल्लवस्य विशेषं महत्त्वम् अस्ति।

(घ) अयथार्यानुभवस्य अपरं नाम अप्रमा इति ।

(ङ) लिंगपरामर्श एवं अनुमानस्य स्वरूपम्।

(च) रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः ।

## प्रश्न–8 का उत्तर

नचिकेतः प्रथमं वरं याचते यत् तस्य पिता वाजश्रवस क्रोधं त्यक्त्वा तं पुनः प्रसन्नचित्तेन स्वीकुर्यात्। यमराजः तं वरं दत्तवान्। एतेन नचिकेतस्य पितृभक्तिः स्पष्टा भवति तथा पितृ-परितोषस्य महत्त्वं अपि ज्ञायते।

## प्रश्न–9 का उत्तर

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्य-धूमवानयं पर्वतः इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः ।

## प्रश्न–10 का उत्तर

### श्लोक

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥

### संस्कृत व्याख्या

अत्र ग्रन्थकारः अन्नंभट्ट ग्रन्थस्य आरम्भे मंगलाचरणं करोति । "निधाय हृदि विश्वेशम्" इत्यनेन सर्वस्य जगतः ईश्वरं स्वहृदयकमले स्मृत्वा तस्य ध्यानं करोति इति बोध्यते। "विधाय गुरुवन्दनम्" इत्यनेन स्वगुरूणां प्रति आदरपूर्वकं नमस्कारं कृत्वा तेषां कृपां प्रार्थयति। ततः "बालानां सुखबोधाय" इति पदेन आरम्भिकविद्यार्थिनां कृते सरलतया तर्कशास्त्रज्ञानस्य बोधनार्थं इति सूच्यते। अन्ते "क्रियते तर्कसंग्रहः" इत्यनेन न्यायदर्शनस्य मुख्यतत्त्वानां संक्षेपेण निरूपणरूपः अयं ग्रन्थः रच्यते इति अभिप्रायः।

## प्रश्न–11 का उत्तर

प्रश्न 26 का उत्तर

**कन्यादानसंकल्पः**

विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णो... इत्यादि पठित्वा । एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्याः कन्याया विषाख्ययोगजननवैधव्यदोषापनुत्तये श्रीविष्णुस्वरूपिणे अश्वत्थकुम्भाय श्रीरूपिणीमिमां कन्यां तुभ्यमहं सम्प्रददे। इति पठित्वा कन्याया दक्षिणहस्ते जलं दत्त्वा तद्धस्तं विष्णुस्वरूपायाश्वत्थकुम्भाय समर्प्य मन्त्रं पठेत् ॥

गौरी कन्यामिमां श्लक्ष्णां यथाशक्ति विभूषिताम् ।
ददामि विष्णवे तुभ्यं सौभाग्यं देहि सर्वदा ॥"

विष्णरूपिणे कुंभायेमां कन्यां संप्रददे ॥

अथवा

जन्मोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं सावित्र्या उत पैप्पलं हि सुतया दद्यादिमां वा रहः । संल्लग्नेऽच्युतमूर्तिपिप्पलघटैः कृत्वा विवाहं स्फुटं दद्यातां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः ॥ कन्यायाः जन्मकुंडल्यां बालवैधव्यकारकः योगः स्यात् चेत् कन्यायाः पितरौ एकान्ते कन्यां नीत्वा निश्चियपूर्वकं सावित्रीव्रतं कारयित्वा एवं पैपलव्रतं कारयिता एवं विष्णुप्रतिमा अश्वत्थः एवं कुम्भः एतैः सह विवाहं कृत्वा इयं कन्या चिरंजीववराय देया एनेनोयायेन वैधव्यदोषपरिहारः भवति एवं द्वाभ्यां वराभ्यां सह विवाहदोषोऽपि नंश्यति।

कन्यापिता सपत्नीकः कुम्भविवाहोक्तान् सम्भारानादाय देवालयं गत्वा शुभासने प्राङ्मुख उपविश्य आचमनं प्राणायामञ्च कृत्वा स्वकन्याया विषकन्यात्वदोषपरिहारार्थं कुम्भविवाहं कुर्यात् ।

प्रश्न 27 का उत्तर

कलशस्य मुखे विष्णुःए कण्ठे रुद्रः समाश्रितः वर्तते । तत्र कलशस्य मूले ब्रह्मा स्थित वर्तते, मध्ये च मातृगणाः स्मृताः । कुक्षौ तु सर्वे सागराः सप्तद्वीपा वसुन्धरा च निवसन्ति । तत्र ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्वणः इति वेदाः अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः सन्तः निवसन्ति । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी च निवसन्ति।

मानवजीवने पितृ-परितोषस्य अत्यधिकं महत्त्वम् अस्ति। पितरौ जीवनस्य प्रथमौ गुरू भवतः । तयोः सेवा, सम्मानः, आज्ञापालनं च पुत्रस्य मुख्यं कर्तव्यं भवति। यः पितृणां तुष्टिं करोति सः जीवनमार्गे सदा सफलः भवति।

## प्रश्न–12 का उत्तर

अस्य वाक्यस्य अर्थः यत् केवलं त्यागेन एव महान् पुरुषाः अमृतत्वं अर्थात् मोक्षं प्राप्नुवन्ति। यः मनुष्यः स्वार्थं त्यक्त्वा परहिताय जीवनं यापयति सः एव उच्चतमं पदं प्राप्नोति। अतः त्यागः आध्यात्मिकजीवने अत्यन्तं महत्वपूर्णः अस्ति।

## प्रश्न–13 का उत्तर

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः। संयोगः, संयुक्त-समवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति । घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः । चक्षुः संयुक्ते घटे रूपस्य समवायात्।

## प्रश्न–14 का उत्तर

<u>तात्त्विकं स्वरूपं</u>--- ओंकारः ब्रह्मणः स्वरूपस्य प्रतीकः अस्ति। सः नित्यः, शाश्वतः, अविनाशी च मन्यते। वेदेषु ओंकारः सर्वश्रेष्ठा पवित्रध्वनिः इति वर्णितः। तस्य ध्यानं कृत्वा मनुष्यः आत्मज्ञानं प्राप्नोति तथा संसारबन्धनात् मुक्तिं लभते ।

<u>महत्त्वं</u> -----कठोपनिषदि यमराजः नचिकेताय उपदिशति यत् ओंकारः ब्रह्मणः श्रेष्ठः प्रतीकः अस्ति। अस्य ध्यानं कृत्वा साधकः परमात्मानं प्राप्नोति। ओंकारः वेदानां सारः तथा मोक्षस्य द्वारम् इति तत्र प्रतिपादितम्।

<u>फल</u>---- ओंकारस्य जपेन मनः शुद्ध भवति, चित्तस्य एकाग्रता वर्धते, आत्मज्ञानस्य प्राप्तिः भवति। एतत् साधनं मनुष्यं मोक्षमार्गे प्रेरयति। अतः उपनिषदेषु ओंकारस्य जपः अत्यन्तं महत्त्वपूर्णः साधनः इति कथ्यते।

***************0000************

प्रश्न 24 का उत्तर

योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम्।
विद्या विज्ञानमास्तिक्यमेतत्ब्राह्मणलक्षणम् ॥

योगः, तपः, दमः, दानं, सत्यंः शौचं, दया, यज्ञः, श्रुतं, विद्या, विनयं, आस्तिक्यं एते सर्वे गुणाः ब्राह्मणे स्युः। एतदेव ब्राह्मणलक्षणम् ।

अथवा

एकविंशत्यहर्यज्ञे विवाहे दश वासराः ।
त्रिषट् चौलोपनयने नान्दीश्राद्धं विधीयते ॥

यज्ञे एकविंशतिदिनात् पूर्वम्, विवाहसंस्कारे दशदिनात् पूर्वम्, चौलसंस्कारे त्रिदिनात् पूर्वम् एवम् उपनयनसं षट्दिनात् पूर्वं नान्दीश्राद्धं करणीयम् ।

प्रश्न 25 का उत्तर

ब्राह्मणजातकानां नाम मङ्गलसूचकं, क्षत्रियाणां शौर्यसूचकं, वैश्यानां ऐश्वर्यसूचकं तथा च शूद्राणाम् सेवाभक्तिसूचकं भवति। ब्राह्मणानां नामान्ते "शर्मा" क्षत्रियाणां नामान्ते "वर्मा" वैश्यानां नामान्ते "गुप्तः" तथा च शूद्राणां नामान्ते "दासः" इति योजितं भवति

अथवा

भद्रं कर्णेभिः शणुयाम देवा भद्रं पश्येमाक्षभिर्ययत्राः स्थिरैरङ्गैस्तुष्टुवाट सस्तनू भिर्व्यशेमहिदेवहितं यदायुः ॥ हे देवाः ! वयं कर्णैः भद्रवचनानि शृणुयाम, हे जयजनीयदेवः । नयनैः वयं कल्याणयुक्तमेव पश्येम, स्थिरैः, अङ्गैः सर्वदेवान् स्तुवन्तः वयं स्वशरीरैः देवदत्तम् आयुः प्राप्नुयाम।

अनेन मन्त्रेण पिता बालकस्य दक्षिणं कर्णं जलेन आर्द्रं करोति।